# श्री महालक्ष्मीस्तोत्रं (विष्णुपुराणांतर्गतं)

**। श्रीगणेशाय नमः ।      । श्रीनारायणाय नमः ।**

**। श्रीपराशर उवाच ।**

सिंहासनगतः शक्रस्संप्राप्य त्रिदिवं पुनः ।
देवराज्ये स्थितो देवीं तुष्टावाब्जकरां ततः ॥

**। इंद्र उवाच ।**

नमामि सर्वलोकानां जननीं अब्धिसंभवाम् ।
श्रियमुन्निद्रपद्माक्षीं विष्णुवक्षःस्थलस्थिताम् ॥ 1

पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणाम् ।
वंदे पद्ममुखीं देवीं पद्मनाभप्रियामहम् ॥ 2

त्वं सिद्धिस्त्वं स्वधा स्वाहा त्वं सुधा लोकपावनी ।
संध्या रात्रिः प्रभा भूतिर्मेधा श्रद्धा सरस्वती ॥ 3

यज्ञविद्या महाविद्या गुह्यविद्या च शोभने ।
आत्मविद्या च देवि त्वं विमुक्तिफलदायिनी ॥ 4

आन्वीक्षिकी त्रयी वार्ता दंडनीतिस्त्वमेव च ।
सौम्यासौम्यैर् जगद्रूपैस्त्वयैतद्देवि पूरितम् ॥ 5

© 2022 Vedam Nadam

का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगचिंत्यं गदाभृतः ॥ 6

त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत्त्वयेदानीं समेधितम् ॥ 7

दाराः पुत्रास्तथाऽऽगारसुहृद् धान्यधनादिकम् ।
भवत्येतन्महाभागे नित्यं त्वद्वीक्षणान्नृणाम् ॥ 8

शरीरारोग्यमैश्वर्यं अरिपक्षक्षयः सुखम् ।
देवि त्वद्दृष्टिदृष्टानां पुरुषाणां न दुर्लभम् ॥ 9

त्वं माता सर्वलोकानां देवदेवो हरिः पिता ।
त्वयैतद् विष्णुना चांब जगद्व्याप्तं चराचरम् ॥ 10

मा नः कोशं तथा गोष्ठं मा गृहं मा परिच्छदम् ।
मा शरीरं कलत्रं च त्यजेथाः सर्वपावनि ॥ 11

मा पुत्रान् मा सुहृद्वर्गान् मा पशून् मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णोर्वक्षःस्थलाश्रये ॥ 12

सत्त्वेन शौच सत्याभ्यां तथा शीलादिभिर्गुणैः ।
त्यज्यंते ते नराः सद्यः संत्यक्ता ये त्वयाऽमले ॥ 13

त्वयाऽवलोकिताः सद्यः शीलाद्यैरखिलैर्गुणैः ।
धनैश्वर्यैश्च युज्यंते पुरुषा निर्गुणा अपि ॥ 14

स श्लाघ्यः स गुणी धन्यः स कुलीनः स बुद्धिमान् ।
स शूरः स च विक्रांतो यं त्वं देवि निरीक्षसे ॥ 15

सद्यो वैगुण्यमायांति शीलाद्याः सकला गुणाः ।
पराङ्ममुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ 16

न ते वर्णयितुं शक्ता गुणान् जिह्वाऽपि वेधसः ।
प्रसीद देवि पद्माक्षि माऽस्मांस्त्याक्षीः कदाचन ॥ 17

**। श्रीपराशर उवाच ।**

एवं श्रीः संस्तुता सम्यक् प्राह हृष्टा शतक्रतुम् ।
शृण्वतां सर्वदेवानां सर्वभूतस्थिता द्विज ॥ 18

**। श्रीरुवाच ।**

परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ।
वरं वृणीष्व यस्त्विष्टो वरदाऽहं तवागता ॥ 19

**। इंद्र उवाच ।**

वरदा यदि मे देवि वरार्हो यदि वाऽप्यहम् ।
त्रैलोक्यं न त्वया त्याज्यमेष मेऽस्तु वरः परः ॥ 20

स्तोत्रेण यस्तथैतेन त्वां स्तोष्यत्यब्धिसंभवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ 21

। **श्रीरुवाच** ।

त्रैलोक्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ।
दत्तो वरो मयाऽयं ते स्तोत्राराधनतुष्टया ॥ 22

यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ।
मां स्तोष्यति न तस्याहं भविष्यामि पराङ्मखी ॥ 23

। **श्रीपाराशर उवाच** ।

एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभागा स्तोत्राराधनतोषिता ॥ 24

भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वमुदधेः पुनः ।
देवदानवयत्नेन प्रसूताऽमृतमंथने ॥ 25

एवं यदा जगत्स्वामी देवराजो जनार्दनः ।
अवतारः करोत्येषा तदा श्रीस्तत्सहायिनी ॥ 26

पुनश्चपद्मा संभूता आदित्योऽभूद् यदा हरिः ।
यदा तु भार्गवो रामस्तदाभूद् धरणीत्वियम् ॥ 27

© 2022 Vedam Nadam

राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषा अनपायिनी ॥ 28

देवत्वे देवदेहेयं मानुषत्वे च मानुषी ।
विष्णोर्देहानुरुपां वै करोत्येषाऽऽत्मनस्तनुम् ॥ 29

यश्चैतश्शृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युतिस्तस्य गृहे यावत्कुलत्रयम् ॥ 30

पठ्यते येषु चैवेषु गृहेषु श्रीस्तवं मुने ।
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ 31

एतत्ते कथितं ब्रह्मन् यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यथा जाता पूर्वं भृगुसुता सती ॥ 32

इति सकलविभूत्यवाप्तिहेतुः
स्तुतिरियमिंद्रमुखोद्गता हि लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यैः
वसति न तेषु कदाचिदप्यलक्ष्मीः ॥ 33

॥ इति श्री विष्णुपुराणे महालक्ष्मी स्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam